**MARCH 2019**

Time : 2½ Hours
Cool-off time : 15 Minutes

Part – II

# SANSKRIT

Maximum : 80 Scores

***General Instructions to Candidates :***

- There is a 'Cool-off time' of 15 minutes in addition to the writing time.
- Use the 'Cool-off time' to get familiar with questions and to plan your answers.
- Read questions carefully before answering.
- Read the instructions carefully.
- Calculations, figures and graphs should be shown in the answer sheet itself.
- Give equations wherever necessary.
- Electronic devices except non-programmable calculators are not allowed in the Examination Hall.

निर्देशा :

1. सर्वे प्रश्ना: समाधेया: ।
2. प्रश्नान् प्रश्ननिर्देशान् च सावधानं पठित्वा उत्तरयत ।
3. प्रश्नानां वाचनाय 15 निमेषा: कल्पिता: ।

1. अधोनिर्दिष्टानां प्रश्नानाम् उत्तराणि कोष्ठकात् निर्धार्य लिखत । (5)

(1) गीतगोविन्दे कति सर्गाः सन्ति ?

[द्वादश, दश, पञ्चदश]

(2) "दिनाभ्यन्तरे मृतिस्तासाम्" –

कस्याः इदं वचनम् ?

[रोस्याः, मातुः, पत्न्याः]

(3) 'महाप्रस्थानम्' इति ग्रन्थस्य कर्ता कः ?

[माटम्प् कुञ्ञुकुट्टन्, कुट्टिकृष्णमारार्, वल्लत्तोल् नारायणमेनोन्]

(4) युनस्को इति अन्तराष्ट्रसभायाः अङ्गीकारः प्रथमतया कस्य केरलीयकलारूपस्य लब्धः ?

[मोहिनियाट्टस्य, कूटियाट्टस्य, कृष्णनाट्टस्य]

(5) भारतीयभाषासु सुघटिता भाषा का ?

[संस्कृतम्, मलयालम्, कन्नटा]

2. अधः प्रदत्तयोः एकस्य उत्तरं लिखत । (6)

(क) प्रदत्तं गीतं पठित्वा आस्वादनटीकां लिखत ।

त्यजति न पाणितलेन कपोलम् ।

बालशशिनमिव सायमलोलम् ।।

(**सूचना** :- कविपरिचयः, ग्रन्थपरिचयः, प्रतिपाद्यविषयः)

(ख) विरहिण्याः राधायाः अवस्थामधिकृत्य लघुटिप्पणीं लिखत ।

**सूचना** :- आवासो विपिनायते ।

मलयजपङ्कम् अपि विषम् ।

निश्वासः कामाग्निरिव प्रतीयते ।

हरिरिति सकामं जपति ।

3. कथांशान् क्रमीकृत्य कथास्तम्भं रचयत । (5)

- तापसी वात्सल्यपूर्णेन चक्षुषा तां विलोक्य स्मितमुखी अभूत् ।
- विषलिप्तः वृक्षः क्रमेण शुष्कः अभवत् ।
- शारिका पुरतः तापसीम् अपश्यत् ।
- वृक्षम् अनादृत्य गन्तुं सा न समर्था ।
- वृक्षः पल्लवितैः पत्रैः शाखाभिः संपुष्टः अभवत् ।

4. प्रदत्तं गद्यभागं पठित्वा अधोनिर्दिष्टानां पञ्च प्रश्नानाम् उत्तराणि लिखत । (5)

मातुः पक्षान्तः निद्रासुखमनुभूयमानाः वयं यथाकथञ्चित् सुप्तोत्थिताः । पितरौ भोजनमन्विष्य गतौ । तयोः आगमनकालं यावत् वृक्ष एव पितरौ इव अस्मान् पोतकानिव संरक्षति स्म ।

मम अनुजानां शब्दं श्रुत्वा एव नीडात् बहिरागता । वृक्षस्य अधः तण्डुलान् प्रसृतान् यदृच्छया अपश्यम् । तण्डुलान् आहर्तुम् उद्युक्तायां 'हा हतोऽस्मि !' इति रूदितमश्रौषम् । वृक्षस्य एका शुष्क-शाखा कस्यचित् जालधारिणः लुब्धकस्य शिरसि अपतत् इव ।

(1) कौ भोजनमन्विष्य गतौ ?

(2) वृक्षस्य अधः किम् अपश्यत् ?

(3) 'पोतकानिव संरक्षति स्म ।' कः संरक्षति स्म ?

(4) "हा । हतोऽस्मि !" कस्य रोदनमिदम् ?

(5) गद्यभागं पठित्वा उचितशीर्षकं लिखत ।

5. अधः प्रदत्तयोः प्रश्नयोः एकस्य उत्तरं लिखत । (6)

(क) प्रदत्तं गद्यभागं पठित्वा पटकथामेकां लिखत ।

कोऽपि मां स्पृशति........ का एषा ?

सा सहसा प्रबुद्धा ।

"वत्से !"

शारिका पुरतः स्मिताननां काञ्चन तापसीम् अपश्यत् ।

"अम्ब ! प्रणामः ।"

शारिके ! जानामि सर्वं वृत्तान्तम् ।

सम्यगाचरितं भवत्या । तव स्नेहस्य, ममतायाः, आर्द्रतायाः च फलं नूनम् प्राप्स्यसि ।

(ख) श्रीनारायणगुरुदेवस्य भूतदयालुतां अधिकृत्य दत्तसूचनानुसारं लघुटिप्पणीं लिखत ।

सूचना : – मठस्य धनापहरणं, न्यायाधिपस्य दण्डः, कुमारनाशान् महाशयेन सह संभाषणं, गुरोराशयः ।

6. श्लोकं पठित्वा गद्यक्रमं पूरयत । (4)

श्लोकः –

यहृदबालकैरन्यैः क्वापि क्रीडारतस्तथा ।

क्वापि चिन्तापरः सर्वैरलक्ष्यत स बालकः ॥

गद्यक्रमः –

सः ________ क्वापि अन्यैः ________ क्रीडारतः तथा ________ चिन्तापरः सर्वैः ________ ।

7. प्रादेशिकभाषया आङ्गलभाषया वा अनुवदत । (5)

"यशोधरे ! जीवितस्य वेदनामहमजानम् । केवलं जीवितुं कियान् क्लेशः अनुभूयते । दिनम्पूर्णे भारं वहन्तः, कठिनं मृदं विदारयन्तः आतपे शिलां धूर्जयन्तः, कूपात् जलं कर्षयन्तः एवमतिकठिनानि कर्माणि कुर्वन्तः ।"

8. अधो दत्तयोः प्रश्नयोः एकस्य उत्तरं लिखत । (8)

(क) प्रदत्ताः सूचनाः पठित्वा पद्मश्री पि.के. नारायणन् नम्प्यार् महोदयस्य जीवनचरितं लिखत ।

| | | |
|---|---|---|
| जननं | : | 27-05-1926 |
| देशः | : | किल्लिक्कुरिश्शिमङ्गलम् , लक्किटि, पालक्काट् । |
| पिता | : | पद्मश्री माणिमाधव चाक्यार् । |
| माता | : | श्रीदेवी नङ्यारम्मा । |
| कर्मरङ्गः | : | कूटियाट्टम्, नङ्यार्कूत्तु पाठकम् । |
| रचनाः | : | अन्तकवधम्, श्रीकृष्णचरितं नङ्यार्कूत्तु, मन्त्राङ्कम् । |
| पुरस्काराः | : | पद्मश्री, केन्द्रसंगीत – नाटकअक्कादमी – फेलोषिप्, टागोर् पुरस्कारः । |

(ख) भारतीयकलासु कूटियाट्टस्य स्थानं तथा तस्य विशेषताः च अधिकृत्य लघूपन्यासं लिखत ।

9. भूतकालार्थे वाक्यं परिवर्तयत । (3)

उदाहरणम् : आरती चर्चां करोति ।

आरती चर्चाम् अकरोत् ।

(क) अक्षया गायति । ________ ________ ।

(ख) अमल् राज् संस्कृतं पठति । ________ ________ ।

(ग) रमेशः क्रीडति । ________ ________ ।

10. पेटिकायाः समानार्थकं पदं चित्वा लिखत । (3)

| |
|---|
| इदानीम् , |
| सम्यक् विवेचनम्, |
| विनिमयः, |
| ग्राहकः । |

(क) अधुना ________ ।

(ख) संवेदनम् ________ ।

(ग) संविवेकः ________ ।

11. संस्कृतभाषया अनुवदत । (3)

(1) കേരളീയ സംസ്കൃത നാടകാഭിനയം ആണ് കൂടിയാട്ടം.

(2) സംസ്കൃതം എല്ലാ ഭാരതീയ ഭാഷകളുടെയും ജനനി ആണ്.

(3) പാണിനി എഴുതിയ സംസ്കൃത വ്യാകരണ ഗ്രന്ഥമാണ് അഷ്ടാദ്ധ്യായി.

12. यथोचितं योजयत । (5)

विष्णुगुप्तः — अमात्यः ।

राक्षसः — नाटकसङ्केतः ।

चन्द्रगुप्तः — वणिक्श्रेष्ठः ।

चन्दनदासः — राजा ।

स्वगतम् — चाणक्यः ।

13. श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत । (6)

ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते ।

सङ्गात्सञ्जायते कामः कामात्क्रोधोऽभिजायते ।।

प्रश्नाः (क) विषयान् ध्यायतः पुंसः कः उपजायते ?

(ख) सङ्गात् कः संजायते ?

(ग) श्लोकस्य आशयं स्ववाक्यैः लिखत ।

14. प्रदत्तेभ्यः वाक्येभ्यः क्त्वान्त-ल्यबन्त – तुमुन्नन्तपदानि चित्वा लिखत । (3)

- मठस्य धनम् अपहृतमिति ज्ञात्वा न्यायाधीशः एकाधिकं शतं ताडनं तस्य दण्डरूपेण अघोषयत् ।
- इमां वार्तां निशम्य खिन्नमानसोऽभवत् ।
- न्यायाधिपः तं चोरकल्पं स्वेच्छया गन्तुम् अनुजज्ञे ।

क्त्वान्तं __________ ।

ल्यबन्तं __________ ।

तुमुन्नन्तं __________ ।

15. उदाहरणानुसारं पदच्छेदं लिखत । (2)

उदा. – तत्रापि = तत्र + अपि ।

क्वापि = _____ + _____

उदा – गतोऽसौ = गतः + असौ ।

नीतोऽसौ = _____ + _____

16. **गद्यभागं पठित्वा त्रीणि प्रश्नवाक्यानि लिखत ।** **(6)**

ओडीषायाः विश्रुतया 'प्रतिभा रे' नामिकया आख्यात्र्या एषा नदी प्राचीप्रभेति कथ्यते । प्राचीं प्रवहन्ती नदी इत्यतः एव प्राची इति नाम प्रसिद्धं भवेत् ।

अत्र विद्यमानेषु नदीषु परिपक्वा कविता दरीदृश्यते । चित्रोत्पला, कुशभद्रा, चन्द्रभागा इत्याद्याः । चन्द्रभागा यत्र सागरं संस्पृशति तत्रैव शिल्पकलायाः परा काष्ठेति पश्चात् प्रसिद्धं सूर्यमन्दिरं प्रादुरभवत् । सूर्यं भ्रमन्त्याः पृथिव्याः भ्रमणपथे विद्यमानेषु सविशेषबिन्दुषु अन्यतमः भवति कोणार्कः ।

(का ?, कीदृशः ?, कुतः ?, कुत्र ?, कः ?)

17. **शुद्धां प्रस्तावनां चित्वा लिखत ।** **(3)**

- अहं संस्कृतं पठामि ।
- लोके विविधाः भाषाः उपयुज्यन्ते ।
- केरलेषु कूटियाट्टं पठितुम् अवसरः नास्ति ।
- भारतीयेषु षट्सु आस्तिकदर्शनेषु अन्यतमं भवति योगदर्शनम् ।

18. "राक्षस !, योग्योऽहं त्वमयोग्य इति किमनेन ?" । कस्य वचनमिदम् ? **(2)**